**दिनाङ्कः - 25.10.2024** **सायम्  - 06:20**

**मुख्यवार्ताः**

- प्रधानमन्त्री नरेन्द्रमोदी जर्मनीदेशीयः शासनाध्यक्षः ओलाफ्-शोल्ज़ इत्येषः च सप्तमस्य अन्तासर्वकारीय-परामर्शस्य सहाध्यक्षतां कृतवन्तौ। भारत-जर्मनी-देशाभ्याम् अनेकेषु सहभागिता-सहमति-पत्रेषु हस्ताक्षरं कृतम् ।
- ओडिशा-राज्यस्य अनेकेषु भागेषु अतिवृष्टिः जायमानास्ति यतो हि दाना इत्याख्यः चक्रवातः समागतः। साहाय्योद्धार-कार्याणि विधीयन्ते।
- झारखण्ड-विधानसभा-निर्वाचनस्य प्रथम-चरणाय नामाङ्कनप्रक्रिया अद्य सम्पन्ना।
- केन्द्रप्रशासनेन वायुप्रदूषणम् अभिलक्ष्य राज्यप्रशासनानि व्यवस्थाः कर्तुम् आदिष्टानि।
- क्रिकेट प्रतिस्पर्धायाम् न्यूजीलैण्डदलम् अद्य द्वितीय-निकषस्पर्धायां पुणेनगरे एकाधिक-त्रिशतं धावनाङ्कैः अग्रत्वं भजते।

**अथ वार्ताः विस्तरेण**

**जर्मनदेशीयः - शासनाध्यक्षः**

प्रधानमन्त्री नरेन्द्रमोदी जर्मनीदेशीयः शासनाध्यक्षः ओलाफ्-शोल्ज़ इत्येषः च अद्य मध्याह्ने नवदिल्ल्यां सप्तमस्य अन्तासर्वकारीय-परामर्शस्य आई.जी.सी. इत्येतस्य सम्मेलनस्य सहाध्यक्षतां कृतवन्तौ। आई.जी.सी. इति एका सम्पूर्ण-सर्वकारीय-संरचनास्ति यस्याः अन्तर्गतं उभयोः देशयोः मन्त्रिणः स्वलक्षितेषु कर्तव्ययुतक्षेत्रेषु चर्चां कुर्वन्ति इति अपि च विचारविमर्शानां परिणामाः प्रधानमन्त्रिणे शासनाध्यक्षाय च प्रस्तुवन्ति।

कार्यक्रमं सम्बोधयन् प्रधानमन्त्री श्रीमोदी उक्तवान् यत् उभौ देशौ द्वाविंशत्यधिक-द्विसहस्रतमे वर्षे जाते एतस्मिन्नेव सम्मेलने द्वि-पक्षीय सहयोगाय महत्वपूर्ण-निर्णयाः

स्वीकृतवन्तौ। विगतद्वये वर्षे रणनीतिक-सम्बन्धानां विभिन्न-क्षेत्रेषु अभूतपूर्व-प्रगतिरपि जाता। अत्रावसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना सूचितं यत् जर्मनी-देशेन कुशल-भारतीय-व्यावसायिकानां वार्षिकं पारगमनानुमतिपत्रस्य आरक्षणं विंशति सहस्रतः नवतिसहस्रं यावत् वर्धयितुं निर्णयः कृतः इति।

प्रतिभा-प्रौद्योगिकी- नवाचार-अवसंरचनाः च भारतस्य विकासस्य साधनानि सन्ति इति प्रधानमन्त्री अवदत्। असौ अग्रे ख्यापितवान् यत् अद्यतनीयं भारतं लोकतन्त्रस्य, जनसाङ्ख्यिक्यः, आग्रहस्य दत्तांशस्य च चतुर्षु दृढस्तम्भेषु स्थितम् अस्ति। भारत-जर्मनी-देशयोः सम्बन्धः प्रत्येकस्मिन् स्तरे सुदृढो भवति। अपि च एतत् भारत-जर्मनी-रणनीतिकसहभागित्वस्य पञ्चविंशतितमं वर्षम् अस्ति, आगामिनः इतोऽपि पञ्चविंशति वर्षाणि अस्मै सम्बन्धाय नूतनम् औन्नत्यं ददति इति।

श्रीमोदी अवदत् यत् अद्य भारतं विविधीकरणस्य, सङ्कट-निवारणस्य च बृहत्तमं केन्द्रं जायमानम् अस्तीति। सः इदमपि अवदत् यत् भारत-प्रशान्तक्षेत्रं विश्वस्य भविष्यस्य कृते अतीवमहत्त्वपूर्णमस्ति इति। जर्मन-व्यापारस्य अष्टादशमे एशिया-प्रशान्तसम्मेलने निजभाषणसमये जर्मनदेशीयः शासनाध्यक्षः ओलाफ् शोल्ज़-इत्येसौ प्रोक्तवान् यत् भारतं विश्वस्य बृहत्तमं लोकतन्त्रं, द्रुतगत्या वर्धमाना प्रमुखा अर्थव्यवस्थापि अस्ति, अनेन भारत-जर्मनी-देशयोः मध्ये समन्वयं वर्धयितुं अपि बलं दत्तम् ।

**राष्ट्रपतिपदासीना- द्रौपदीमुर्मूइत्येषा**

राष्ट्रपतिपदासीना द्रौपदी-मुर्मूइत्येषा वञ्चितवर्गस्य सेवाः प्राधान्यं दातुम् चिकित्साविद्यार्थिभिः आग्रहं कृतवती । राष्ट्रपतिः अवोचत् यत् दूरस्थेषु क्षेत्रेषु निवसतां जनानां कल्याणार्थं नवीनतमानां चिकित्सा-तन्त्राणां उपयोगः करणीयः इति। रायपुरस्य अखिल-भारतीय-आयुर्विज्ञान-संस्थानस्य-एम्स् इत्येतस्य रायपुरस्य दीक्षान्त-समारोहं सम्बोधयन्ती राष्ट्रपतिः उक्तवती यत् गतदशसु वर्षेषु देशवासिनां कृते सार्वत्रिक-स्वास्थ्य-व्याप्तिं प्रदातुं बहवः उपायाः कृताः सन्ति। छत्तीसगढस्य

राज्यपालः रामेन डेका इत्ययं  मुख्यमन्त्री विष्णुदेव साई इत्येषः  च अस्मिन् अवसरे उपस्थितौ आस्ताम् ।

इतः पूर्वं राष्ट्रपतिः छत्तीसगढ़स्य द्विदिवसीययात्रार्थं रायपुरं प्राप्तवती।

**विरामः**

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in  इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

**दाना-चक्रवातः**

ओडिशा-पश्चिमबङ्गालराज्ययोः अनेकेषु भागेषु अतिवृष्टिः जायमानास्ति यतो हि दाना इत्याख्यः चक्रवातः समागतः। एषः चक्रवातः ह्यः रात्रौ ओडिशातटे भितरकनिका राष्ट्रियोद्यान-धामरा-इत्यनयोः क्षेत्रयोः मध्ये प्रविष्टः। येन हि सस्यानि विद्युद्स्तम्भाः वृक्षाः च क्षतिग्रस्ताः जाताः। साम्प्रतं यावत् जनजीवनं प्रभावितं नैव जातम्। मुख्यमन्त्री मोहनचरण-माझी इत्यसौ अद्य प्रातः भुवनेश्वरे क्षतिग्रस्त-वस्तूनां साहाय्योद्धार-प्रयासानाञ्च समीक्षां कृतवान्। तत्रैव, पश्चिमबङ्गालराज्यस्य विभिन्नेषु जनपदेष्वपि नैरन्तर्येण प्रातः आरभ्य वृष्टिः भवत्येव। भारत-ऋतु-विज्ञान-विभागेन उद्घोषितं यत् अयं चक्रवातः साम्प्रतं दुर्बलं जातम्। आकाशवाण्या सह सम्भाषमाणः ऋतु-विज्ञान-विभागस्य महानिदेशकः डॉक्टर मृत्युञ्जय महापात्रा सूचितवान् यत् चक्रवातप्रभावेन ओडिशा-पश्चिमबङ्गालराज्ययोः भागेषु अद्य महती वृष्टिः भवति। तिरुवनन्तपुरम - कोट्टायम - इडुक्की - एर्नाकुलम - त्रिशूर - जनपदेभ्यः नारङ्गवर्णिकी सञ्चेतना प्रसारिता विभागेन।

**झारखण्ड-विधानसभा**

झारखण्ड-विधानसभा-निर्वाचनस्य प्रथम-चरणाय नामाङ्कनप्रक्रिया अद्य सम्पन्ना। एतस्मिन् प्रथमे चरणे राज्यस्य त्रिचत्वारिंशत्-नैर्वाचनिक-क्षेत्रेभ्यः नवम्बरमासस्य त्रयोदशदिनाङ्के मतदानं भविष्यति। पूर्व-मुख्यमन्त्री चम्पईसोरेनः सरायकेलातः आजसू-दल-प्रमुखः च सुदेश-कुमार-महतो इत्यसौ सिल्लीतः स्वनामाङ्कनपत्रं पूरितवन्तौ। पूर्वमन्त्री

राधाकृष्णकिशोरः छत्तरपुर विधानसभा क्षेत्रात् स्वीयनामाङ्कन पत्रं पूरितवान्। नामाङ्कनपत्राणाम् अनुसन्धेयकार्यम् अस्यमासस्य अष्टाविंशति दिनाङ्के अथ च नामाङ्कन प्रत्यावर्तनं त्रिंशद्दिनाङ्कं यावत् प्रत्याशिनः कर्तुं शक्नुवन्ति। तत्रैव आदर्शाचारसंहितायाः उल्लङ्घनाय साम्प्रतं चतुर्दश प्राथमिक्यः समङ्किताः।

**रेलवे-विशेषयानानि**

आगामिनं दीपावली पर्व-छठपूजोत्सवं च अभिलक्ष्य यात्रिसम्मर्दं दूरीकर्तुं रेलमन्त्रालयेन सप्तसहस्रं यावत् विशिष्ट रेलयानानि प्रचाल्यन्ते। रेलमन्त्री अश्विनीवैष्णवः नवदिल्ल्यां अवदत् यत् एतैः विशेषरेलयानैः प्रतिदिनं प्रायः द्विलक्षं यावत् यात्रिणः यात्रां कर्तुं शक्नुवन्ति। सः अवदत् यत् अस्मिन् वर्षे विशेषरेलयानानां संख्या सप्तसहस्त्राणि यावत् वर्धितानि या हि गतवर्षे सार्धचतुःसहस्रं यावत् एव आसीत्।

**मन की बात-कार्यक्रमः**

प्रधानमन्त्री नरेन्द्रमोदी आगामिनि रविवासरे स्वीये “मन की बात” इत्यस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। “मन की बात” इति मासिक-कार्यक्रमस्य इदं पञ्चशाधिक एकशतं संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी-दूरदर्शनम्-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालय-इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरम् अनुक्षण अयं कार्यक्रमः क्षेत्रीय-भाषास्वपि श्रोतुं शक्यते। क्षेत्रीय-भाषासु अस्य पुनः प्रसारणं रात्रौ भविता।

**क्रिकेट**

क्रिकेट प्रतिस्पर्धायाम् न्यूजीलैण्ड दलेन अद्य पुणेनगरे भारतं विरुध्य द्वितीय-निकषस्पर्धायाः द्वितीये पर्याये पञ्चक्रीडकानां हानिपुरस्सरं अष्टनवत्यधिकैकशतं धावनाङ्काः निर्मिताः। अतिथिदलं साम्प्रतं एकाधिक त्रिशतं धावनाङ्कैः अग्रत्वं भजते।

।।इति वार्ताः।।